नं० ९२२-घ

(धर्मशास्त्रम्)

मत्स्यपुराणीयदेवता प्रतिमा प्रासादनिर्माण

नं० ९२२-घ

१५ पत्रे

पत्राणि १५ (असम्पूर्णम्)

लि० संवत १९०२

नं० ६२२-घ

मत्स्यपुराणीयदेवताप्रतिमाप्रसादनिर्माणम्

पत्राणि १५ (असम्पूर्णम्)

लि० संवत् (१६०२)

ण मिश्रकैर्हस्ती सप्तभिः परिकीर्तितः। एकेन ध्वजस्तु द्विचत्वारिभिः सिंहः प्रकीर्तितः।
पंचभिः वृषभः प्रोक्तो विकोणस्थान् विवर्जयेत्। तमेवाष्टगुणं कृत्वा विधार्यं द्विविध
सुलक्षणं। सप्तविंशो हते भागे नक्षत्रं विनिर्दिशेत्। अष्टाभिर्भाजिते रुद्रे यच्छेषं तद्व्ययो
मतः। व्ययाधिकं न कुर्वीत तत्र दोषकरं भवेत्। आयाधिकेन भवेत् शान्तिरित्याह भगवा
न्हरिः। कृत्वा गते द्विजवरान् पूर्णकुंभं दध्यक्षतामदलपुष्पफलोपशोभम्। द
त्वा हिरण्यवसनानि तथा द्विजेभ्यो मांगल्यशान्तिनिलयाय गृहे विशेत्। गृह्योक्तहो
म विधिना बलिकर्म कुर्यात् प्रासादवास्तुशमने च विधिर्य उक्तः। संतर्पयेद् द्विजवरा
न्भक्ष्यभोज्यैः शुक्लाम्बरः स्वभवनं प्रविशेत् सधूपं। इति श्रीमत्स्यपुराणे वास्तुविद्यायां ३
भिनवभवनप्रवेशो नाम वास्तुविद्याकीर्तनं समाप्तं॥ २ ॥ अथ पञ्चमः॥ क्रियायोगं क
थं सिध्येत गृहस्थस्य विभुः सर्वदा। ज्ञानयोगसहस्राद्धि कर्मयोगो विशिष्यते। सूत उवा
च। क्रियायोगं प्रवक्ष्यामि देवतार्चानुकीर्तनं। भुक्तिमुक्तिप्रदं यस्मान्नान्यल्लोकेषु वि २
द्यते। प्रतिष्ठायां सुराणां तु देवतार्चानुकीर्तनं। देवयज्ञोत्सवं चापि बंधनाद्येन मुच्यते।
विष्णोस्तावत् प्रवक्ष्यामि यादृग्रूपं प्रशस्यते। शंखचक्रधरं शान्तं पद्महस्तं गदाधरम्॥

नाकारं शिरस्तस्य कंबुग्रीवं शुभेक्षणं। तुंगनासं शुक्तिकर्णं प्रशांतोरुभुजक्रमं। क्वचिद्द्वि
भुजं कुर्याच्चतुर्भुजमथापरं। द्विभुजश्चापि कर्त्तव्यो भवनेषु पुरोधसा। देयमष्टभुजस्या
स्य यथास्थानं निबोधत। खड्गो गदा धरः पद्मं देयं दक्षिणतो हरेः। धनुश्च खेटकं चैव
शंखचक्रे च वामतः। चतुर्भुजस्य वक्ष्यामि यथा वायुधसंस्थितेः। दक्षिणेन गदापद्मं वा
सुदेवस्य कारयेत्। वामतः शंखचक्रे च कर्त्तव्ये भूतिमिच्छता। कृष्णावतारे तु गदा वामहस्ते
प्रशस्यते। यथेच्छया शंखचक्रे चोपरिष्टात्प्रकल्पयेत्। अधस्तात्पृथिवी तस्य कर्त्तव्या
पादमध्यतः। दक्षिणे प्रणतं तद्वद्गरुत्मंतं निवेशयेत्। वामतस्तु भवेल्लक्ष्मीः पद्महस्ता शु
भानना। गरुत्मानग्रतो वापि संस्थाप्यो भूतिमिच्छता। श्रीश्च पुष्टिश्च कर्त्तव्या पार्श्वयोः
पद्मसंयुते। तोरणं चोपरिष्टात्तु विद्याधरसमन्वितं। पत्रवल्लीसमोपेतं सिंहव्यालसमन्वि
तं। देवदुंदुभिसंयुक्तं गंधर्वमिथुनान्वितं। तथा कल्पलतोपेतं स्तुवद्भिरमरेश्वरैः। एवंवि
तो धो भवेच्छिल्पिभागेनाल्पपीठिका। नवतालप्रमाणास्तु देवदानवकिन्नराः। अतः परं प्रव
क्ष्यामि मानोन्मानं विशेषतः। जालान्तरप्रविष्टानां भानूनां यद्रजः स्फुटं। त्रसरेणुः स विज्ञेयो
बालाग्रं तैरथाष्टभिः। तदष्टकेन लिख्या तु यूका लिख्याष्टकैर्मता। यवो यूकाष्टकस्तद्वत्
तैरष्टाभिस्तथांगुलं। स्वकीयांगुलमानेन मुखं स्याद्द्वादशांगुलं। मुखमानेन कर्त्तव्या सर्वावि

यवकल्पना: सौवर्णी राजती वापि ताम्री रत्नमयी तथा । शैलदारुमयी वापि लोहसंघमयी तथा । रीति
का धातुयुक्ता वा ताम्रकांस्यमयी तथा । शुभदारुमयी वापि देवतार्चा प्रशस्यते । अंगुष्ठपर्वादारभ्य
वितस्तिर्यावदेव तु । गृहेषु प्रतिमा कार्या नाधिका शस्यते बुधैः । आषोडशं तु प्रासादे कर्त्तव्या वि
धिका ततः । मध्योत्तमकनिष्ठां तु कार्या वित्तानुसारतः । द्वारोच्छ्रायस्य यन्मानमष्टधा तत्तु कार
येत् । भागद्वयेन प्रतिमा त्रिभागीकृत्य तत्पुनः । पीठिका भागतः कार्या नातिनीचा न चोच्छ्रिता प्र
तिमामुखमानेन नवभागान्प्रकल्पयेत् । चतुरंगुला भवेद्ग्रीवा भागेन हृदयं पुनः । नाभिस्तस्मा
दधः कार्या भागेनैकेन शोभना । निम्नत्वे विस्तरत्वे च अंगुलं परिकीर्त्तितं । नाभेरधस्तान्मे
ढ्रं भागेनैकेन कल्पयेत् । द्विभागेनायतावूरू जानुनी चतुरंगुले । जंघे द्विभागे विख्याते पादौ च च
तुरंगुलौ । चतुर्दशांगुलस्तद्वन्मौलिरस्य प्रकीर्त्तितः । ऊर्द्ध्वमानमिदं प्रोक्तं पृथुत्वं च निबोधत ।
सर्वावयवमानेषु विस्तरं शृणुत द्विजाः । चतुरंगुलं ललाटं स्यादूर्द्ध्वं नासा तथैव च । द्व्यंगुलं च
हनुस्तेषु मोष्ठस्त्वंगुलसंमितः । अष्टांगुलं ललाटं तु तावन्मात्रे भ्रुवौ स्मृते । अर्द्धांगुला भ्रुवोर्ले
खा मध्ये धनुराकृती तथा । उन्नता ग्रा भवेत्पार्श्वे श्लक्ष्णा तीक्ष्णा प्रशस्यते । अक्षिणी द्व्यंगुलायामे
तदर्द्धं चैव विस्तरे । उन्नतोदरमध्ये तु रक्तान्ते शुभलक्षणे । तारका ... त्रिभागेन दृष्टिः स्यात्पंचमा
६

गिका। द्व्यंगुलं तु भ्रुवोर्मध्ये नासामूलमथांगुलं। नासाग्रं विस्तरं तद्वत् तत्पुरद्वयमुत्तमं। नासापु
टविलं तद्वत् द्व्यंगुलमुदाहृतं। कपोले द्व्यंगुले तद्वत् ते कर्णमूलादि निःसृते। हन्वग्रमंगुलं तद्वत् विस्तरो
द्व्यंगुलो भवेत्। अर्धांगुला भ्रुवो राजी प्रलालसदृशी समा। अर्धांगुलसमस्तद्वदुत्तरोष्ठस्तु विस्तरे।
तिष्यावसदृशं तद्वन्नासापुटतलं भवेत्। स्रक्किणी घ्राणतुल्ये तु कर्णमूलात् षडंगुले। कर्णौ तु भ्रूसमो
त्तेयौ उर्ध्वं तु चतुरंगुलौ। द्व्यंगुले कर्णपार्श्वे तु मात्रामेकां तु विस्तृते। कर्णयोरुपरि स्कन्धे मस्तकं द्वा
दशांगुलं। ललाटं पश्चाद्देहे प्रोक्तमष्टादशांगुलं। षड्विंशदंगुलं चास्य परिणाहः शिरोगतः।
सकेशनिचयस्यास्य द्वात्रिंशदंगुलं। केशान्ता हनुकान्तं तद्दंगुलानि तु षोडश। ग्रीवा मध्ये परि
णाहश्च तु विंशतिकांगुलं। अष्टांगुला भवेद्ग्रीवा वायु पृथुलेन प्रशस्यते। स्तनग्रीवान्तरं प्रोक्तमेकतालं
स्वयंभुवा। स्तनयोरन्तरं तद्वत् द्वादशांगुलमिष्यते। स्तनयोर्मण्डलं तद्वत् यवांगुलं परिकीर्तितं। चूच
कौ मण्डलस्यान्त्र यवमात्रावुभौ स्मृतौ। द्वितालश्चापि विस्तारो वक्षःस्थलमुदाहृतं। कक्षे षडंगुले प्रोक्ते २
कक्ष्मूलस्तनान्तरे। चतुर्दशांगुलौ पादावंगुष्ठौ तु त्र्यंगुलौ। पंचांगुलपरीणाहमंगुष्ठाग्रं तथोन्नतं।
अंगुष्ठकसमा तद्वद्दायामस्यास्य प्रदेशिनी। तस्याः षोडशभागेन हीयते मध्यमांगुली। अनामिकाष्टभा
गेन कनिष्ठा चापि हीयते। सर्वत्रैव त्र्यंगुलः गुल्फौ द्व्यंगुलकौ समौ। पार्ष्णिर्द्व्यंगुलमात्रा तु कलयोश्चा
प्रकीर्तिता। द्विपर्वौ अंगुष्ठकः प्रोक्तः परिणाहेन सर्ववान्। प्रदेशिनी परीणाहस्त्वष्टौ वै समुदाहृतः। कन्यसा वा

= त्र्यंगुल २

षड्भागेन हीयते त्र मध्यमो हि जाः। अंगुलेनैव भूयः कार्यो अंगुष्ठस्य विशेषतः। तदर्द्धेन तु भवेद्वा सव्यामं
गुलीनां तथैव भूयः। यथा ग्रीव परिणाहस्तु अंगुलानि चतुर्दश। जंघामध्ये परीणाहस्तथैव वा द्वादशांगु
लः। जानुमध्ये परीणाहः एकविंशतिरंगुलः। जानूर्ध्वयोगुलः प्रोक्तो मंडलं तु त्रिरंगुलं। ऊरुमध्ये
परीणाहः अष्टाविंशतिकांगुलः। एकत्रिंशोपरि स्थाने वृषणौ तु त्रिरंगुलौ। अंगुलं च तथा मेढ्रपरिणा
२ हे षडंगुलं। मणिबंधादिमां विधा कोशा बां तथैव च। मणिकोशपरीणाहः श्वेत रंगुल इष्यते। विस्ता
रेण भवेत्तत्र कटिरष्टादशांगुला। द्वाविंशतिस्तथा श्रोणिः स्तनौ च द्वादशांगुलौ। नाभिमध्ये परीणा
हे द्विचत्वारिंशदंगुलः। पुरुषे पंचपंचाशत्। कक्षां चैव तु वेष्टनं। कक्षयोरुपरिष्टात्तु स्कंधौ प्रोक्तौ ष
डंगुलौ। अष्टांगुलानि विस्तारः ग्रीवां चैव तु निर्दिशेत्। परिणाहस्तथा ग्रीवा कला द्वादश त्रिर्दिशेत्।
आयामो भुजयोस्तद्वद्द्विचत्वारिंशदंगुलः। कार्यं तु बाहुशिखरं प्रमाणं षोडशांगुलं। ऊर्द्ध्वं तद्वत्कुर्प
र्वं त्रिविधा द्वादशांगुलं। तस्यैकांगुलहीनं तु द्वितीयं पर्व उच्यते। बाहुमध्ये परीणाहो भवेदष्टादशां
गुलः। षोडशोक्तः प्रबाहुस्तु पुष्करो ग्रकरो मतः। सप्तांगुलं करतलं पंचमध्यांगुली मता। अनामिका
मध्यमायाः सप्तभागे महीयते। तस्यास्तु पंचभागेन कनिष्ठा परिहीयते। मध्यमा मध्यमायां तु अंगुल
त्रयमायतं। ज वत्सु वस्तु स वो सांत स्यास्तस्याः हीयते। अंगुष्ठपर्वमध्यं तु तर्जन्यास्तदशोभितं। प
र्वद्वयाधिकं तद्वच्छेषपर्वत्रिदाहृतं। पर्वार्द्धेन नखान्कुर्या द्विधा दंगुली प्रोक्तमंततः। स्निग्धं तु नखं तु वीत
र्घदंतं तथा — मानि म्नप । तथैव केशवः कार्यः स्कंधो

परिदशांगुलः । स्त्रियः कार्यास्तु तन्वंग्यः स्तनोरुजघनाधिकाः । चतुर्दशांगुलानामम् उदरं तासु निर्दिशे
त् । नानाभरणसंपन्नाः केचिच्छ्लक्ष्णभुजास्तथा । किंचिद्दीर्घं भवेद्वक्त्रमलकावलिरुत्तमा । नासाग्रीवाललला
टं च सार्द्धमात्रां निधिं ... मुखं । अधरं द्व्यंगुलं विस्तारं शस्यते धरपल्लवः । अधिकं नेत्रयुग्मं तु चतुर्भागेन
२ निर्दिशेत् । ग्रीवावलिश्च कर्त्तव्या किंचिदर्द्धांगुलोच्छ्रया । एवं नारीषु सर्वासु देवानां प्रतिमासु च । नव
तालमिदं प्रोक्तं लक्षणं पापनाशनं । इति श्रीमत्स्यपुराणे देवतार्चनकीर्तने प्रमाणानुविभागो नाम ।
सूत उवाच । अतः परं प्रवक्ष्यामि शिवपूजार्चाकारमुत्तमं । आपीनोरुभुजस्कंधस्तप्तकांचनसन्निभः ।
भृत्को रूरश्मिसंघातश्चंद्रांकितजटो विभुः । जटामुकटधारी च द्व्यष्टवर्षाकृतिः । बाहू वारणह
स्ताभौ वृत्तजंघोरुमंडलः । ऊर्ध्वकेशस्तु कर्त्तव्यो दीर्घायतविलोचनः । व्याघ्रचर्मपरीधानः कटिसू
त्रत्रयान्वितः । हारकेयूरसंपन्नो भुजंगाभरणस्तथा । बाहवश्चापि कर्त्तव्या नानाभरणभूषिताः । पी
नोरुगंडफलकः कुंडलाभ्यामलंकृतः । आजानुलंबबाहुश्च सौम्यमूर्तिः सुशोभनः । खेटकं वाममह
स्ते तु खड्गं चैव तु दक्षिणे । शक्तिं दंडं त्रिशूलं च दक्षिणेषु निवेशयेत् । कपालं वामपार्श्वे तु नागं खट्वां
गमेव च । एकश्च वरदो हस्तस्तथान्यस्त्वक्षयापरः । वैशाखस्थानकं कृत्वा नृत्याभिनयसंस्थितः । २
नृत्ये दशभुजः कार्यो गजासुरवधे तथा । तथा त्रिपुरदाहे च बाहवः षोडशैव तु । शंखचक्रगदाशार्ङ्ग
घंटास्तत्राधिको भवेत् । तथा धनुः पिनाकं तु शरो विष्णुमयस्तथा । चतुर्भुजोऽष्टबाहुर्वा ज्ञानयोग
श्वरो मतः । तीक्ष्णनासाग्रदशनः करालवदनो महान् भैरवः शस्यते लोके प्रत्यायतनसंस्थितः ।

नमस्कुलायतनेकार्ये भैरवस्तु भयंकरः। नारसिंहो वराहो वा तथान्येपि विभयंकरः। नाधिकांगी नहि
नांगीः कर्त्तव्या देवताः क्वचित्। स्वामिनं घातयेन्न्यूना करालवदना तथा। अधिका शिल्पिनं हन्या
त्कृशा चैवार्थनाशिनी। कृशोदरी तु दुर्भिक्षं निर्मांसा धननाशिनी। वक्रनासा तु दुःखाय संक्षिप्तां
गी भयंकरी। चिपिटा दुःखशोकाय अनेत्रा नेत्रनाशिनी। दुःखदा हीनवक्त्रा तु पाणिपादकृशा तथा
हीनांगा हीनजंघा च भ्रमोन्मादकरी नृणां। शुष्कवक्त्रा तु राजानं कटिहीना च या भवेत्। पाणिपादवि
हीना वा जायते मकरो महान्। जंघाहीना तु जानुभ्यां शत्रुकल्याणकारिणी। पुत्रमित्रविनाशाय ही
ना वक्षस्थले तु या। संपूर्णावयवा या तु आयुर्लक्ष्मीप्रदा सदा। एवं लक्षणमासाद्य कर्त्तव्यः परमेश्व
रः। स्तूयमानः सुरैः सर्वैः समंताद्दर्शयेद्भवम्। एकेन नंदिना चैव महाकालेन शंकरं। प्रणता
लोकपालाश्च पार्श्वे तु गणनायकः। नृत्यद्भृंगिरिटिश्चैव भूतवेतालसंवृतः। सर्वे हृष्टास्तु कर्त्तव्याः
स्तुवंतः परमेश्वरं। गंधर्वविद्याधरकिन्नराणामथाप्सरोगुह्यकनायकानां। गणैरनेकैः शतशो मं
हेन्द्रमुनिप्रवीरैरपि नम्यमानं। धृतोपहारैः सततप्रवालपुष्पोपहारस्तवलिंदहृद्भिः। स्तूयमानं
भगवंतमीढं देवत्रयेण नरमर्त्यरूपम्। इतिश्रीमत्स्यपुराणे नरेश्वरकीर्त्तनं नाम। सूत उवाच
अधुना संप्रवक्ष्यामि अर्द्धनारीश्वरं परं। अर्द्धेन देवदेवस्य नारीरूपं सुशोभनं। ईशार्द्धे तु जटाभागो बा
लेंदुकलया युतः। उमार्द्धे चापि दातव्यौ सीमंततिलकावुभौ। वासुकिं दक्षिणे कर्णे वामे कुंडलमादि
शेत्। वालिकां चोपरिष्टात्तु कपाले दक्षिणे करे। त्रिशूलं चापि कर्त्तव्यं देवदेवस्य शूलिनः। वामतो

दर्पणं दद्यादुत्पलं तु विशेषतः। वामबाहुश्च कर्त्तव्यः केयूरवलयान्वितः। उपवीतं तु कर्त्तव्यं मणिमुक्तामयं
यं तथा। स्तनभारं मेघाढ्यं तु वामे पीनं प्रकल्पयेत्। हारं त्वहमुज्वलं कुर्यात्स्तनौ तादृशं च तथैव च। नितम्बदेशमु
द्धृतं कुर्यात् आघ्राजिनकृताम्बरं। विमलं च परीधाय कटिसूत्रत्रयान्वितं। नानारत्नसमोपेतं दक्षिणं
४ भुजमान्वितं। देवस्य दक्षिणं पादं पद्मोपरि सुसंस्कृतं। किंचिदूर्ध्वं तथा वामं भूषितं नूपुरेण तु। र
त्नैर्विभूषितान् कुर्यात् दिव्यांगुलीष्वंगुलीयकाम्। सालक्तकं तथा पादं पार्वत्याः दर्शयेत्सदा। अर्द्धना
रीश्वरस्यैतद्रूपमस्मिन्तु दृश्यते। उमामहेश्वरस्यादि लक्षणं च समं तथा द्विजाः। संस्थानं तु तयोर्व
क्ष्ये लीलाललितविभ्रमौ। चतुर्भुजं द्विबाहुं वा जटाभारं तु भूषितं। लोचनत्रयभूषितं। लोचन
त्रयसंयुक्तम् एकवक्त्रधपाणिना। दक्षिणेनोत्पलं श्रेष्ठं वामे कुचभरे करं। द्वीपिचर्मपरीधानं
नानारत्नोपशोभितं। सुप्रतिष्ठं सुवेषं च तथार्द्धेन्दुकृतासनम्। वामे तु संस्थिता देवी तस्योरौ वा
हुगुहिता। त्रिनेत्रभूषणैः संयुक्ता कर्णे केलिलालितानना। सवालिका कर्णवती ललाटतिलकोज्ज्व
लम्। मणिकुण्डलसंयुक्ता कर्णिकाभरणान्विता। हारकेयूरबहुला हरवक्त्रावलोकिनी। वा
मांसं देवदेवस्य स्पृशंती लीलया ततः। दक्षिणं तु बहिः कृत्वा बाहुं दक्षिणतस्तथा। स्वधेव
दक्षिणे कुचौ स्पृशंत्यांगुलिभिः कंचित्। वामे तु दर्पणं दद्यादुत्पलं वा सुशोभनं। कटिसूत्रत्रयं ४
चैव नितंबे स्यात्सालंबकं। जया च विजया चैव कार्त्तिकेयविनायकौ। पार्श्वयोर्दर्शयेत्तत्र तो
रणे गणगुह्यकान्। माला विद्याधरा [illegible] :। एतद्रूपमुमेशस्य कर्त्तव्यं

भूतिभिर्वृता। शिवनारायणं वक्ष्ये सर्वपापप्रणाशनं। वामार्द्धे माधवं विद्याद्दक्षिणे शूलपा
णिनं। वक्षःद्वयं च कक्ष सर्पमेखलिकेयूरभूषितं। शंखचक्रधरं शान्तमारक्तांगुलिविभ्र
मं। चक्रस्थाने गदां चापि पाणौ दद्यादधस्तने। शंखं चैवेतरे दद्यात्कर्द्धे भूषणलोलम्बलापी
तवस्त्रापरीधानं वा रत्नमालिभूषणं। दक्षिणार्द्धे जटाभारमर्द्धेन्दुकृतलक्षणं। भुजंगहा
रवलयं वरददक्षिणं करौ। द्वितीयं वामके कुर्वीत त्रिशूलवरधारिणं। व्यालोपवीतसंयुक्तं
कर्द्धे कृत्तिवाससं। मणिरत्नैश्च संयुक्तं पादं नागविभूषितं। शिवनारायणस्यैवं कल्प
येद्रूपमुत्तमं। महावराहं वक्ष्यामि पद्महस्तं गदाधरं। तीक्ष्णदंष्ट्राग्रघोणास्यं मेदिनी
वामकूर्परं। दंष्ट्राग्रेणोद्धृतां दत्वा धरणीमुत्पलान्वितां। विस्मयोत्फुल्लनयनामुप
रिष्टात्प्रकल्पयेत्। दक्षिणं कटिसंस्थं तु करं तस्य प्रकल्पयेत्। कूर्मोपरि तथा पादमेकं
नागेन्द्रमूर्द्धनि। संस्तूयमानं लोकेशैः समन्तात्परिकल्पयेत्। नारसिंहं तु कर्त्तव्यं भुजाष्ट
कसमन्वितं। रौद्रं सिंहासनं तद्वद्विदारितमुखेक्षणं। स्तब्धपीनसटाकर्णं दारयन्तं दितेः
सुतं। विनिर्गतान्त्रजालं च दानवं परिकल्पयेत्। वमन्तं रुधिरोद्गारं भ्रुकुटीवदनेक्षणं।
युध्यमानश्च कर्त्तव्यः क्वचित्करणबन्धनैः। परिश्रान्तेन दैत्येन तर्ज्यमानं मुहुर्मुहुः। दैत्यं
प्रदर्शयेत्तत्र खड्गखेटकधारिणं। स्तूयमानं तथा विष्णुं दर्शयेदमराधिपैः। तथा त्रिविक्र
मं वक्ष्ये ब्रह्माण्डक्रमणोल्बणं ... प्रदर्शयेत्। अधस्ताद्वामनं

तद्वत्कल्पयेत्स कमंडलुं। दक्षिणे घटिकां दद्याद्गरुडं दीनं प्रदर्शयेत्। भृंगारधारिणं तद्वद्दक्षिणे
तस्य च पार्श्वतः। वंधनं वापि कर्त्तव्यं गरुडं तस्य कल्पयेत्। मत्स्यरूपं तथा मत्स्यं कूर्मं कूर्माकृतिं
न्यसेत्। एवं रूपस्तु भगवान्कार्यो नारायणो हरिः। ब्रह्मा कमंडलुधरः कर्त्तव्यः स चतुर्मुखः।
५ हंसारूढः क्वचित्कार्यः क्वचिच्च कमलासनः। वर्णतः पद्मगर्भाभश्चतुर्बाहुः शुभेक्षणः। कमंडलुं
5 वामकरे स्रुवं हस्ते तु दक्षिणे। वामे दंडधरं तद्वत्स्रुतं चापि प्रदर्शयेत्। मुनिभिर्देवगंधर्वैः स्तू
यमानं समंततः। कुर्वाणमिव लोकान्त्रीन्शुक्लांबरधरं विभुं। मृगचर्मधरं चापि दिव्ययज्ञो
पवीतिनं। आज्यस्थालीं न्यसेत्पार्श्वे वेदांश्च चतुरः परः। वामपार्श्वेऽस्य सावित्री दक्षिणे
तु सरस्वती। अग्रे च ऋषयस्तद्वत्कार्याः पैतामहे पदे। कार्त्तिकेयं प्रवक्ष्यामि तरुणादित्य
सप्रभम्। कमलोदरवर्णाभं स कुमारं सुकुमारकं। दंडकैश्चीरकैर्युक्तं — मयूरवाहनं दर
स्थानीये खेटनगरे भुजान्द्वादश कल्पयेत्। चतुर्भुजः खर्वटे स्याद्वने ग्रामे द्विबाहुकः। श
क्तिः पाशस्तथा खड्गः शरः शूलं तथैव च। वरदश्चैकहस्तः स्यादथवाप्यभयदो भवेत्। ए
ते दक्षिणतो ज्ञेयाः केयूरकटकोज्ज्वलाः। धनुः पताका मुष्टिश्च तर्जनी तु प्रसारिता। खे
टकं ताम्रचूडश्च वामहस्तेषु शस्यते। द्विभुजस्य करे शक्तिर्वामे स्यात्कुक्कुटोपरः। चतुर्भुजे
शक्तिपाशौ वामतो दक्षिणे त्वसिः। वरदोभयदो वापि दक्षिणे स्यात्तुरीयकः। विनायकं प्र ५
वक्ष्यामि गजवक्त्रं त्रिलोचनं। लंबोदरं चतुर्बाहुं व्यालयज्ञोपवीतिनं। स्तब्धकर्णं बृहत्तुंड
मेकदंतं पृथूदरं। स्वदंतं दक्षिणकरे उत्पलं चापरे तथा। मोदकं परशुं चैव वामतः परि
कल्पयेत्। हस्ता... [illegible] ...द्विकं तु द्विभ्यामधस्तात्

मूषकान्वितं । कात्यायिन्याः प्रवक्ष्यामि रूपं दशभुजं तथा । त्रयाणामपि देवानामनु
ए कारिणीम् । जटाजूटसमायुक्तामर्द्धेन्दुकृतलक्षणां । लोचनत्रयसंपन्नां पद्मेन्दुस
दृशाननां । अतसीपुष्पसंकाशां सुप्रतिष्ठां सुलोचनां । नववौवनसंपन्नां सर्वाभरणभूषितां
। सुचारुदशनां तद्वत्पीनोन्नतपयोधरां । त्रिभंगस्थानसंस्थानां महिषासुरमर्दिनीं । त्रिशूलं द
क्षिणे दद्यात्खड्गं चक्रं तथैव च । तीक्ष्णबाणं तथा शक्तिं ■म होपि निबोधत । खेटकं सपूर्ण पा
चापं च पाशमंकुशमेव च । घंटां च परशुं चापि वामतः संनिवेशयेत् । अधस्तान्महिषं तद्वद्वि
शिरस्कं प्रदर्शयेत् । शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनं । हृदि शूलेन निर्भिन्नं निर्यदंत्र
विभूषितं । रक्तरक्तीकृतांगं च रक्तस्रावान्वितेक्षणं । वेष्टितं नागपाशेन भ्रुकुटीभीषणा
ननां । वमद्रुधिरवक्त्रं च देव्याः सिंहं प्रदर्शयेत् । देव्यास्तु दक्षिणं पादं समं सिंहोपरिस्थितं । किं
चिदूर्द्ध्वं तथा वाममंगुष्ठं महिषोपरि । स्तूयमानं च तद्रूपममरैः संनिवेशयेत् । इदानीं सुर
राजस्य रूपं वक्ष्ये विशेषतः । सहस्रनयनं देवं मत्तवारणसंस्थितं । पृथूरुवदनो वक्षो सिंहस्कं
धमहाभुजं । किरीटकुंडलधरं पीवरोरुभुजेक्षणं । वज्रोत्पलधरं तद्वन्नानाभरणभूषितं ।
पूजितं देवगंधर्वैरप्सरोगणसेवितं । छत्रचामरधारिण्यः पार्श्वे तस्य प्रदर्शयेत् । सिंहासनग
तं चापि गंधर्वगणसंवृतं । इंद्राणीं वामतस्तस्य कुर्यादुत्पलधारिणीं । इति श्रीमत्स्यपुराणे देवतानु
कीर्त्तनं नाम । सूत उवाच । प्रभाकरस्य प्रतिमामिदानीं शृणुत द्विजाः । रथस्थं कारयेद्देवं पद्मह
स्तं सुलोचनं । सप्ताश्वं चैकचक्रं च रथं तस्य प्रकल्पयेत् । मुकुटेन विचित्रेण पद्मगर्भसमप्रभं ।

नानाभरणभूषाभ्यां भुजाभ्यां धृतपुष्करं । स्कंधस्थपुष्करे ते तु लीलयैव धृते सदा । चोलकश्छन्न
वपुषं कंचिच्चित्रेषु दर्शयेत । वस्त्रयुग्मसमोपेतं च रत्नतेजसावृतौ । प्रतीहारौ च कर्त्तव्यौ पार्श्वयो
र्दंडिपिंगलौ । कर्त्तव्यौ खड्गहस्तौ तु पार्श्वयोः पुरुषावुभौ । लेखनीकृतहस्तं च पार्श्वे धातारमव्ययं ।
नानादेवगणैर्युक्तमेवं कुर्याद्दिवाकरं । अरुणं सारथिं चास्य पद्मपत्रसन्निभः । अश्वौ तु च
६ लितग्रीवाववधौ तस्य पार्श्वयोः । भुजंगरज्जुभिर्बद्धाः सप्ताश्वा रश्मिसंयुताः । पद्मस्थं वाहनस्थं वा प
6 मरूपं प्रकल्पयेत । वह्नेस्तु लक्षणं वक्ष्ये सर्वकामफलप्रदं । दीप्तं सुवर्णवपुषं अर्द्धचंद्रासने स्थितं
। बालार्कसदृशं तस्य वसनं चापि कारयेत । यज्ञोपवीतिनं चैव धवलं कूर्चापरं तथा । कमंडलुं वाम
करे दक्षिणे त्वक्षसूत्रकं । ज्वालावितानसंयुक्तमजवाहनमुज्ज्वलं । कुंडस्थं वापि कुर्वीत मू
र्ध्नि सप्तशिखान्वितं । तथा यमं प्रवक्ष्यामि दंडपाशधरं विभुं । महामहिषमारूढं कृष्णांजनच
योपमं । सिंहासनगतं वापि दीप्ताग्निसमलोचनं । महिषश्चित्रगुप्तश्च करालाः किंकरास्तथा
समंताद्दर्शयेत्तस्य सौम्यासौम्यान् सुरासुरान् । राक्षसेंद्रं तथा वक्ष्ये लोकपालं च नैरृतं । नरा
रूढं महाकायं रक्षोभिर्बहुभिः कृतं । खड्गहस्तं महानीलं कज्जलाचयसन्निभं । नरयुक्तविमा
नस्थं पीताभरणभूषितं । वरुणं च प्रवक्ष्यामि पाशहस्तं महाबलं । शंखस्फटिकवर्णाभं सित २
वारांवराहृतं । झषासनगतं शांतं किरीटवरधारिणं । वायुरूपं प्रवक्ष्यामि धूम्रं तु मृगवाहनं
। चित्रांबरधरं शांतं युवानं कुंचितभ्रुवं । मृगाधिरूढं वरदं पताकाध्वजसंयुतं । कुबेरं च प्रव
क्ष्यामि कुंडलाभ्यामलंकृतं । हारकेयूररचितं सितांबरधरं शुभं । गदाधरं च कर्तव्यं वरदं

मुकुटान्वितं। नरयुक्तं विमानस्थं मेषस्थं वापि कारयेत्। वर्णैस्त्रिपीतरक्तेन गुह्यकैः परिवारितं। म
होदरं महाकायं निधिपद्मकसमान्वितं। गुह्यकैर्बहुभिर्युक्तं धनव्यग्रकरैस्तथा। तथैवेशं प्रवक्ष्यामि
धवलं धवलेक्षणं। त्रिशूलपाणिनं देवं त्र्यक्षं वृषगतं प्रभुं। मातॄणां लक्षणं वक्ष्ये यथावदनुपू
र्वशः। ब्रह्माणी ब्रह्मसदृशी चतुर्वक्त्रा चतुर्भुजा। हंसाधिरूढा कर्त्तव्या साक्षसूत्रकमंडलुः। मह
स्म श्वररूपेण तथा माहेश्वरी मता। जटामुकुटसंयुक्ता वृषस्था चंद्रशेखरा। कपालशूलखट्वांग
वरदा च चतुर्भुजा। कुमाररूपा कौमारी मयूरवरवाहना। रक्तवस्त्रधरा तद्वच्छूलशक्तिधरा तथा। हा
रकेयूरसंपन्ना कृकवाकुधरा तथा। वैष्णवी विष्णुसदृशा गरुडे समुपस्थिता। चतुर्बाहुश्च वरदा
शंखचक्रगदाधरा। सिंहासनगता वापि बालकेन समन्विता। वाराहीं च प्रवक्ष्यामि महिषोप
रि संस्थितां। वराहसदृशीं देवीं घंटाचामरधारिणीं। गदाचक्रधरां तद्वद्दानवेंद्रविनाशिनीं। इंद्रा
णीमिंद्रसदृशीं वज्रशूलगदाधरां। गजासनगतां देवीं लोचनैर्बहुभिर्वृतां। तप्तकांचनवर्णाभां
दिव्याभरणभूषितां। तीक्ष्णखड्गधरां तद्वद्ध्यायेद्योगेश्वरीमिमां। दीर्घजिह्वां मूर्द्धकेशीं मांसखं
डैश्च मंडितां। दंष्ट्राकरालवदनां कुर्याच्चैव कृशोदरीं। कपालमालिनीं देवीं मुंडमालाविभूषितां।
कपालं वामहस्ते तु मांसशोणितपूरितं। सकेशं च शिरस्त्वप्यस्मिन्सत्तिकां दक्षिले तथा। गृध्रस्था
वायसस्था वा निर्मांसा विगतोदरी। करालवदना तद्वत्कर्त्तव्या सा त्रिलोचना। चामुंडा बद्धघंटा च
द्वीपिचर्मधरा शुभा। दिग्वासाः कालिका तद्वद्रासभस्था कपालिनी। सुरक्तपुष्पाभरणा वर्द्धनी
ध्वजसंयुता। विनायकोच कर्तव्यो [illegible] लिकैः सह। वीरेश्वरश्च भगवान्वृषारूढो जटाधरः।

वीणाहस्ता । त्रिशूली च मातॄणामग्रतो भवेत् ॥ श्रियं देवीं प्रवक्ष्यामि नवे वयसि संस्थितां । सुयौवनां पी
नगंडां रक्तोष्ठीं कुंचितभ्रुवं । पीनोन्नतस्तनतटां मणिकुंडलधारिणीं । सुमंडलं मुखं तस्याः शिरः
सीमंतभूषितं । पद्मस्वस्तिकशंखैर्वा भूषितां कुंतलालकैः । कंचुकाबद्धगात्रौ च हारभूषौ पयोध
६ रौ । नागहस्तोपमौ बाहू केयूरकटकोज्वलौ । पद्मं हस्ते तु दातव्यं श्रीफलं दक्षिणे भुजे । मेखलाभर
णां तद्वत् तप्तकांचनसप्रभां । नानाभरणसंपन्नां शोभनांबरधारिणीं । पार्श्वे तस्याः स्त्रियः कार्याश्चाम
रव्यग्रपाणयः । पद्मासनोपविष्टा तु पद्मसिंहासनस्थिता । करिभ्यां स्नाप्यमानासौ भृंगाराभ्यामने
कमलप्रतिपालयंतौ करौ भृंगाराभ्यां तथापरौ । स्तूयमाना च लोकेशैस्तथा गंधर्वगुह्यकैः । तथैव य
क्षिणी कार्या सिद्धासुरनिषेविता । पार्श्वयोः कलशौ तस्यास्तोरणे देवदानवाः । नागाश्चैव तु कर्त
व्याः खड्गखेटकधारिणः । अधस्तात् प्रकृतिस्तेषां नाभेरूर्ध्वं तु पौरुषी । फणाश्च मूर्ध्नि कर्तव्या द्वि
जिह्वा बहवः समाः । पिशाचा राक्षसाश्चैव भूतवेतालजातयः । निर्मांसाश्चैव ते सर्वे रौद्रा विकृतरू
पिणः । क्षेत्रपालोऽथ कर्तव्यो जटिलो विकृताननः । दिग्वासा जटिलस्तद्वत् श्वगोमायुनिषेवितः । क
पालं वामहस्ते तु शिरः केशैः समावृतं । दक्षिणे शक्तिकां दद्यादसुरक्षयकारिणीं । अथातः सं
प्रवक्ष्यामि द्विभुजं कुसुमायुधं । पार्श्वे चास्य मुखं तस्य मकरध्वजसंयुतं । दक्षिणे पुष्पबाणं च ६
वामे पुष्पमयं धनुः । प्रीतिः स्याद्दक्षिणे तस्य भोजनोपस्करान्विता । रतिश्च वामपार्श्वे तु शयनोप
स्करान्विता । पटश्च पटहश्चैव खरः कामातुरस्तथा । पार्श्वे तु जलवापी च वनं नंदनमेव चा
सुशोभनस्तु कर्तव्यो भगवान् कुसुमायुधः । संस्थानमीषद्वक्रं स्याद् विस्मयस्मितनेत्रकं ।

एतदुद्देशतः प्रोक्तं प्रतिमालक्षणं मया। विस्तरेण न शक्नोति बृहस्पतिरपि द्विजाः। इति श्रीमत्स्यपुरा-
णे देवतार्चानुकीर्त्तने प्रतिमालक्षणं नाम। सूत उवाच। पीठकालक्षणं वक्ष्ये यथावदनुपूर्वशः। पीठोच्छ्रा-
यं यथावच्च भागान्षोडश कारयेत्। भूमावेकः प्रविष्टः स्याच्चतुर्भिर्जगती मता। वृत्तो भागस्तथैकः
स्याद्वृत्तपट्टस्तु भागतः। भागैस्त्रिभिस्तथा कंठः कंठपट्टस्त्रिभागतः। भागाभ्यामूर्ध्वपट्टश्च एकभागेन
पट्टिका। प्रविष्टं भागमेकैकं जगती यावदेव तु। निर्गमस्तु पुनस्तस्य यावदेकैकपट्टिका। वारिनिर्गमना-
र्थं तु तत्र कार्यः प्रणालकः। पीठिकानां तु सर्वासामेतत्सामान्यलक्षणं। विशेषाद्देवताभेदाच्छृणुध्वं
द्विजसत्तमाः। स्थंडिला वाथ वापी च यक्षी वेदी च मंडली। पूर्णचंद्रा च वज्रा च पद्मा चार्द्धशशी तथा। त्रि-
कोणा दशमी तासां संस्थानं च निबोधत। स्थंडिला चतुरस्रा च वर्जिता मेखलादिभिः। वापी द्विमेख-
ला ज्ञेया यक्षी चैव त्रिमेखला। चतुरस्रायता वेदी न ता लिंगेषु योजयेत्। मंडला वर्तुला या तु मेखला
त्रिगुणान्विया। रक्ता द्विमेखला मध्ये पूर्णचंद्रा तु सा भवेत्। मेखलात्रयसंयुक्ता षडस्रा वज्रिका भवेत्।
षोडशास्रा भवेत्पद्मा किंचिद्ध्रस्वा च मूलतः। तथैव धनुराकारा सार्द्धचंद्रा प्रशस्यते। त्रिशूलसदृशी
तद्वत् त्रिकोणा ऊर्ध्वतो मता। प्रागुदक्प्लवना तद्वत्प्रशस्ता लक्षणान्विता। परिवृत्तस्त्रिभागेन निर्गमं का-
रयेद्द्विजाः। विस्तारं तत्प्रमाणं च मूले चाग्रे तथार्द्धतः। जलमार्गश्च कर्त्तव्यस्त्रिभागेन सुशोभनः। लिंग-
घं स्यार्द्धभागेन स्थौल्येन समधिष्ठिता। मेखला तत्त्रिभागेन खातं चैव प्रमाणतः। अथवा पादहीनं तु शोभनं
कारयेत्सदा। उत्तरस्थं प्रमाणं च प्रमाणादधिकं भवेत्। स्थंडिलायामथारोग्यं धनधान्यं च पुष्कलं। गोप्रदा
च भवेद्यक्षी वेदी संपत्प्रदायिका। मंडलायां भवेल्लक्ष्मीः कीर्त्तिः पूर्णचंद्रिका। आयुःप्रदा भवेद्वज्रा पद्मा

सौभाग्यदायिनी। पुत्रप्रदार्द्धचंद्राख्या त्रिकोणा प्राणनाशिनी। देवस्य यजनार्थं तु पिंडिका दर्शिता मया।
शैले शैलमयीं दद्यात् पार्थिवे पार्थिवीं तथा। दारुजे दारुजा कार्या मिश्रे मिश्रा तथैव च। नान्ययो
निस्तु कार्या वै सदा शुभफलेप्सुभिः। अर्चायामासनं दैर्घ्यं लिंगायामसमं तथा। यस्य देवस्य
८ या पत्नी पीठसा परिकल्पयेत्। मया तत्सर्वमाख्यातं समासात् पीठलक्षणं। इति श्रीमत्स्यपुरा
8 णे पीठानुकीर्त्तनो नाम। सूत उवाच। अथातः संप्रवक्ष्यामि लिंगलक्षणमुत्तमं। सुस्निग्धं च
सवर्णं च लिंगं कुर्याद्विचक्षणः। प्रसादस्य प्रमाणेन लिंगमानं विधीयते। लिंगमानेन वा विद्या
त्प्रसादं शुभलक्षणं। चतुरस्रे समे गर्ते ब्रह्मसूत्रं निपातयेत्। वामेन ब्रह्मसूत्रस्य अर्चा वा लिं
गमेव च। प्रागुत्तरेण लीनं तु दक्षिणापरमाश्रितं। पुरस्यापरदिग्वामे पूर्वद्वारे तु कारयेत्।
पूर्वेण चापरद्वारं माहेंद्रं दक्षिणोत्तरे। द्वारं विभज्य पूर्वं च एकविंशतिभागिकं। ततो मध्यगं
ते तेषां त्यक्त्वा ब्रह्मसूत्रं प्रकल्पयेत्। तस्यार्द्धं तु त्रिधा कृत्वा भागं वोत्तरं त्यजेत्। एकं दक्षिणे त्यक्त्वा ब्रह्म त० ८
स्थानं प्रकल्पयेत्। भागार्द्धेन तु यं लिंगं कार्यं तद्दि[illegible]हरण्यते। पंचभागविभक्तेन त्रिभागो ज्येष्ठमुच्य
ते। भाजिते नवधा गर्भे मध्यमं पंचभागिकं। एकस्मिन्नेव नवधा गर्भे लिंगानि कारयेत्। समस्तं तं वि
भज्याथ नवधा गर्भभाजितं। ज्येष्ठार्द्धं कन्यसोर्द्धं च तथा मध्यममध्यमं। एवं गर्भः समाख्यातस्त्रिभि
र्भागैर्विभाजयेत्। ज्येष्ठं तु त्रिविधं ज्ञेयं मध्यमं त्रिविधं तथा। कन्यसं त्रिविधं तद्वल्लिंगभेदान्नवैव तु।

त५

नासार्द्धमष्टभागेन विभज्याथ समं बुधः। भागत्रयं परित्यज्य निष्कंभं चतुरस्रकं। अष्टास्रं मध्यमं
ज्ञेयं भागं लिंगस्य वैष्णवं। विकर्णे वै ततो गद्य कोणां लांछयते बुधः। अष्टास्रं कारयेत्तद्वद्
मप्येवमेव तु। किंचिच्च भूमिकं ज्ञात्वा षोडशास्रं प्रदर्शयेत्। षोडशी श्री कृत्तं पश्चाद्वर्त्तुलं कार
येत्ततः। आयामात्तस्य देवस्य नाहं वै कुंडलीकृतं। महेश्वरं त्रिभागं तु ऊर्ध्वे रत्नं तु संस्थितं। अध
स्ताद्ब्रह्मभागं तु चतुरस्रो विधीयते। अष्टास्रो वैष्णवो भागो मध्यमस्य उदाहृतः। एवं प्रमा
णसंयुक्तं लिंगं वृद्धिप्रदं भवेत्। चतुर्दशं तद्विभज्याथ निष्कंभं तु प्रकल्पयेत्। तदेवमायतं सूत्रं
भागत्रयं विकल्पितं। अधस्ताच्चतुरस्रं तु अष्टास्रं मध्यभागतः। षण्मभागस्ततो ऊर्ध्वं तु वाह्य भाग
स्तथोच्यते। आयामे यद्भवेत्सूत्रं नाहस्य चतुरस्रके। चतुरस्रं परित्यज्य अष्टास्रं तु तदा भवेत्। तस्या
र्द्धं परित्यज्य ततो वृत्तं तु कारयेत्। शिरः प्रदक्षिणं तस्य संक्षिप्तं मूलतो न्यसेत्। अष्टधा ज्यं भवेल्लिंगमध
स्तात्तु विनिश्चयतः। शिरः प्राग्वे दातिपं भवनेल्लक्षणान्वितं। सौम्यं तु दृश्यते यंतु लिंगं तद्वृद्धिदं
भवेत्। अधमूलेन मध्ये तु प्रमाणं सर्वतः समं। एवं विधे तु यल्लिंगं भवेत्तत्सर्वकामिकं। अन्यथा यद्भ
वेल्लिंगं तदशस्तं प्रचक्षते। एवं रत्नमयं कुर्यात् स्फाटिकं पार्थिवं तथा। शुभदारुमयं चापि यद्वा म
नसे रोचते। इति श्रीमत्स्यपुराणे देवतानुकीर्तनं नाम। ऋषय ऊचुः। देवानामथ चैतेषां प्रतिष्ठा
विधिमुत्तमं। वदस्व तत्त्व यथान्यायं सर्वेषामप्यशेषतः। सूत उवाच। अथातः संप्रवक्ष्यामि प्रतिष्ठाविधिमु

त्तमं। कुंडमंडपदेवानां प्रमाणं च यथाक्रमं। चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवे तथा। माघे वा सर्व
देवानां प्रतिष्ठा शुभदा भवेत्। प्राप्य पक्षं शुभं शुक्लं मतीते चोत्तरायणे। पंचमी च द्वितीया च तृतीया स
प्तमी तथा। दशमी पौर्णमासी च तथा ज्येष्ठा त्रयोदशी। आसु प्रतिष्ठा विधिवत् कृता बहुफलप्रदा। आषा
ढा द्वे तथा मूलमुत्तरात्रयमेव च। ज्येष्ठा श्रवणरोहिण्यः पूर्वाभाद्रपदस्तथा। हस्ताश्विनी रेवती च पु
ष्यो मृगशिरस्तथा। अनुराधा तथा स्वाती प्रतिष्ठादिषु शस्यते। बुधो बृहस्पतिः शुक्रस्त्रय एते शुभा
वहाः। एभिर्निरीक्षितं लग्नं नक्षत्रं च प्रशस्यते। ग्रहताराबलं लब्ध्वा ग्रहपूजां विधाय च। निमित्तं श
कुनं लब्ध्वा वर्जयित्वाद्भुतादिकं। शुभस्थाने शुभे योगे क्रूरग्रहविवर्जिते। लग्ने स्थिरे च कुर्वीत प्रति
ष्ठादिकमुत्तमं। अयने द्वे विषुवे तद्वत् षडशीतिमुखे तथा। एतेषु स्थापनं कार्यं विधिदृष्टेन कर्मणा।
प्राजापत्ये तु शयनं श्वेते तूत्थापनं तथा। मुहूर्ते स्थापनं कुर्यात् पुनर्ब्राह्मे विचक्षणः। प्रासादस्याग्रतो वा
पि पूर्वे वा मंडपो भवेत्। हस्तान् षोडश कुर्वीत दश द्वादश वा पुनः। मध्ये च वेदिकां कुर्याद्युक्तः परिस्त्रिपूः सम
ततः। पंच सप्त चतुर्वापि करान् कुर्वीत वेदिकां। चतुर्भिस्तोरणैर्युक्तो मंडपश्च चतुर्मुखः। प्राच्ये तु हारं भ
वेत् सर्वे याम्ये चौदुंबरं भवेत्। पश्चादश्वत्थघटितं। नैयग्रोधं तथोत्तरे। भूमौ हस्तप्रविष्टानि चतुर्हस्ता
नि वै धुये। स्फूपलिप्तं तथा श्लक्ष्णं भूतलं स्यात् सुशोभनं। वस्त्रैर्नानाविधैस्तत्र पुष्पपल्लवशोभनं। कृते
वं मंडपं सम्यक् चतुर्द्वारं प्रविन्यसेत्। अव्रणान् कलशानष्टौ जलकांचनगर्भितान्। चूतपल्लवसंछन्नान् सि
तवस्त्रयुगान्वितान्। सकूर्चचंदनफलोपेतान् सचंदनोदकस्तरितान्। एवं निवेश्य तत्र गंधधूपार्चनादि

भिः। ध्वजादिरोपणं कार्यं मंडपस्य समंततः। ध्वजांश्च लोकपालानां सर्वदिक्षु निवेशयेत्। पताकाः
जलदाकारा मध्ये स्यान्मंडपस्य तु। गंधधूपादिकं कुर्यात् स्वैः स्वैर्मंत्रैरनुक्रमात्। बलिं च लोकपा
लानां स्वमंत्रेण निवेदयेत्। ऊर्ध्वं तु वस्त्रमालेयं स्यात् स्वधस्याच्छ पवासकः। संहितायां तु ये मंत्रास्त
द्दैवत्याः प्रकीर्तिताः। तैः पूजा लोकपालानां कर्तव्या तु समंततः। त्रिरात्रमेकरात्रं वा पंचरात्रमथापि
वा। अथवा सप्तरात्रं तु कार्यं स्यादधिवासनं। एवं सतोरणं कृत्वा अधिवासनमंडपं। अस्य पूर्वोत्तरतः
कुर्यात् स्नानमंडपमुत्तमं। तदर्द्धेन त्रिभागेन पंचभागेन वा पुनः। आनीय लिंगमर्चित्वा [illegible]लिनः मर्चवित्
पूजयेद् बुधः। वस्त्राभरणरत्नैश्च ये चान्ये परिचारकाः। द्रुमध्वमिति तान् ब्रूयाद् यजमानोऽस्य ततः
परं। देवं प्रक्षाल्य कृत्वा नेत्रज्योतिः प्रकल्पयेत्। लक्षणं वरणं वस्त्रं लिंगस्यापि समासतः। स
र्वतस्तु बलिं दद्यात् सिद्धार्थघृतपायसैः। पुष्पकुंभे रत्नं कृत्वा घृतगुग्गुलधूपितं। विप्राणां च
रणं कुर्याद् द्विधा कृत्वा च दक्षिणां। ग्राममेकं कनकं तद्वद्देवस्याथ निवेदयेत्। लक्षणं कारयेद्
स्या मंत्रेणानेन वै द्विजाः। ॐ नमो भगवते तुभ्यं शिवाय हरये नमः। हिरण्यरेतसे विष्णो वि
श्वरूपाय वै नमः। मंत्रोऽयं सर्वदेवानां नेत्रज्योतिष्व विस्मृतः। एवं मामंत्र्य देवेशं कांचनेन वि
लेखयेत्। मंगलानि च वाद्यानि ब्रह्म[illegible]घोषं च गीतकं। दृष्ट्वा कार्यो द्रान्मांगल्यं चाति
वारयेत्। लेह्यं लाघवं कुर्यात् लिंगस्य समाहितः। त्रिधा विभज्य पूजांगं लक्षणं स्यादि
भागिकं। रेखात्रयं तु कर्तव्यं [illegible] यतः। न स्यादेतत् नवकं छेदवर्जितं।

त्रिभागायचप्रमाणेन ज्येष्ठा लिंगस्य कारयेत्। लक्षणानि ततस्तु कर्त्तव्या सुदा मध्यमकं न्यसेत्।
अष्टभागं ततः कृत्वा त्यक्त्वा भागत्रयं बुधाः। लंबयेत मतिरेखां तु पार्श्वयोरुभयोः समं। न्यास्य
ते पंचभागोर्द्धं संगमं कारयेत्ततः। तावत्प्रलंबयेद्विद्वान्यावद्भागचतुष्टयं। रेखाद्वयस्य संगमं
१० तद् द्वौ भागौ पृष्ठतो भवेत्। एवमेतत्समाख्यातं समासाल्लिंगलक्षणं मया। इति श्री मत्स्यपुराणे प्र
तिष्ठानुकीर्तने मंडपाध्यायः। सूत उवाच। अतः परं प्रवक्ष्यामि मूर्त्तिजानां तु लक्षणं। स्थाप
-10 कस्य समासेन लक्षणं शृणुत द्विजाः। सर्वावयवसंपूर्णो वेदमंत्रविशारदः। पुराणवेत्ता त
२१ त्त्वज्ञो दंभमोहविवर्जितः। कृष्णसारस्य देशोत्पन्नः सुप्रभाषितः। शौचाचाररतो नित्यं पाषं
ड कुले निःस्पृहः। सम शत्रौ च मित्रे च ब्रह्मोपेंद्रहरप्रियः। ऊहापोहार्थतत्त्वज्ञो वास्तुशास्त्रस्य
पारगः। आचार्यस्तु भवेन्नित्यं सर्वदोषविवर्जितः। मूर्त्तिपास्तु द्विजाः श्रेष्ठाः कुलीना ऋजवस्तथा
। द्वात्रिंशत्षोडश वापि अष्टौ वा वास्तुपारगाः। ज्येष्ठमध्यकनिष्ठेषु मूर्त्तिपावः प्रकीर्त्तिताः। १०
ततो लिंगमथार्च्चां वा नीत्वा स्नापनमंडपं। गीतमंगलघोषेण स्नापनं तत्र कारयेत्। पंचगव्य
कषायेण मृद्भिर्भस्मोदकेन च। स्नापेत तत्र प्रकुर्वीत वेदमंत्रचतुष्टयात्। समुद्रज्येष्ठमंत्रेण
आपो हि ष्ठेति चापरं। या ओषधीरिति मंत्रश्च आपो हि ष्ठेति चापरं। एवं स्नाप्य ततो देवं धूपयेद्गंधानुले
पनैः। प्रच्छाद्य वस्त्रयुग्मेन अभिवस्त्रेण सुराहतं। उत्थापयेत्ततो देवमुत्तिष्ठ ब्रह्मणस्पते। आम्र

रजेति च तथा रत्ते तिष्ठेति चापरे॥ रथेवृलरद्येवा विधत्तं छित्वि गुलेन च। आरोप्य चानयेद्धि
हन्ना कलशेन प्रवेशयेत्। ततः प्रास्तीर्य सर्वयाास्थापयेच्छयनके भुवि। कुशानास्तीर्य पुष्पाणि
स्थापयेत्प्राङ्मुखं ततः। ततस्तु त्रिफ्त कलशं वस्त्रकांचनसंयुतं। शिरोभागे नदेवस्य जपुन्नेव
निधापयेत्। आपो देवीति मंत्रेण आपो स्मान्मातरीति च। ततो दुकूलपट्टेन छाद्य नेत्रोपधा
नकं। दशच्छिद्रासिदेवसाको ... वा विचक्षणं। मधुनं सर्पिषा भ्यज्य देवस्य ... ततः आ
प्यायस्वेति मंत्रेण या ते रुद्र शिवेति च। उपविष्टपार्चयेद्देवं गंधधूपैः समन्वितं। तितं प्रशांत(?)
धा ... दुकूलपट्टैः का ... नानाविचित्रैरथापि वा। आ... घदेवं सर्वत्र छत्रचामर
दर्पणं। पार्श्वतः स्थापयेत्तत्र वितानं पुष्पसंयुतं। रत्नान्यो वध्यस्तत्र गृहोपकरणानि च। भाजना
नि विचित्राणि शयनान्यासनानि च। अभि ... मंत्रेण यथाविभवतो न्यसेत्। क्षीरं दधि घृत
तद्धृतं भक्ष्यभोज्यान्नपायसैः। षडविधैश्च रसैस्तत्र ... तर्पयेत्। बलिं दद्यात्प्रयत्नेन मंत्रे
णानेन भूरिधाः(?)। त्रिपंचकं जनानां महे इति सर्वतः। शून केभुवि। मूर्त्तिपान्स्थापयेत्पश्चात्सर्वदि
क्षु विचक्षणः। चतुरो द्वारपालांश्च द्वारेषु विनिवेशयेत्। आसूक्तं पावमानी सोमसूक्तं सुमंगलं(?)
तथा च शांतिका ध्यायं ... तथैव च। रक्षोघ्नं च तथा सूक्तं सर्वतो बहुधा पठेत्। रुद्रानपुरु
षसूक्तं च श्लोकाध्यायं सभ्युक्तिपं(?)। तथैव मंडलाध्यायमध्वर्युर्दक्षिणे जपेत्। वामदेव्यं बृहत्साम
ज्येष्ठसाम रथंतरं। तथा पु... ... भामं भूअ निच सामानि छंदोगः।

पश्चिमे जपेत्। अथर्वांगिरसं तद्वन्नीलरौद्रं तथैव च। तथापराजितां देवीं मधुसूक्तं सरौद्रकं। तथै
व शान्तिकाध्याय मथर्वर्चोत्तरे जपेत्। शिरस्या नेतु देवस्य स्थापके होममाचरेत्। शान्तिकैः पौष्टिकै
स्तद्वन्मंत्रैर्व्याहृतिसर्वकैः। पलाशोदुंबराश्वत्थ अपामार्गसमिधा तथा। कृत्वा सहस्रमेकैकं स्वपादेतु
संस्पृशेत्। ततो होमसहस्रेण हुत्वा कुत्वा ततस्ततः। नाभिमध्ये तथा वक्त्रः शिरश्चाप्यालभेत्पुनः। हस्त
मात्रेषु कुंडेषु मूर्त्तिपाः सर्वतो दिशं। समेखलेषु ते कुर्याद्योनिवक्त्रेषु वादनात्। वितस्तिमात्रा योनिः
स्यात्कुर्णोष्ठसदृशी तथा। आयता छिद्रसंयुक्ता पार्श्वतः कलया श्रिता। कुंडात्मेकलानुसारेण सर्वत
श्चतुरंगुला। विस्तारेण भवेयात्तद्वच्चेतुरस्रा समाभवेत्। देवानिर्जितिपारित्यज्य त्र्यैन्द्रं शाभिरंगुलैः।
एवं नवसु कुंडेषु लक्षितेन्वैव दृश्यते। आग्नेय्यां च कायामेषु होतव्यमुद गायनैः। शांतये लोकपाल
भ्यः मूर्तिभ्यः क्रमशस्तथा। तथा मूर्त्यधिदेवानां होमं कुर्यात्समाहितः। वसुधा वसुरेता च यजमानो
दिवाकरः। जलं वायुस्तथा सोम आकाशश्चाष्टमः स्मृतः। देवस्य मूर्त्तयस्त्वष्टौ वेताः कुंडेषु संस्थ
रेत्। एतासामधिपान्वक्ष्ये विप्रा मूर्त्तिपामताः। पृथिवी पातु सर्वस्तु पशुपश्चाग्निमेव च। यजमानं
तथैवोग्रो रुद्रश्चादित्यमेव च। भवो जलं सदा पाति। वायुमीशान एव च। महादेवस्तथा चंद्रं भीमश्चा
काशमेव च। सर्वदेवप्रतिष्ठासु मूर्त्तिपा ह्येत एव च। एतेभ्यो वैदिकैर्मन्त्रैर्यथास्वं होममाचरेत्। त
था शान्तिघटं कुर्यात्प्रतिकुंडेषु सर्वतः। शतं ते वा सहस्रांते स्वकर्णं हुतिरिष्यते। सम्पादो
स्तथोर्ध्वं स्पृष्ट्वा प्रणतामाविनिक्षिपेत्। आहुतीनां तु संपातं पूर्णं कुंभेषु संन्यसेत्। मूलमध्यांत
मानेषु देवतेनाच संचयेत्। स्थितं च स्नापयेत्तेन संयता हुतवारिणा। प्रतियामेषु धूपं तु ने

वेधं चंदनोदकं। पुनः पुनः प्रकुर्वीत होमः कार्यः पुनः पुनः। पुनः पुनश्च दातव्या यजमानेन दक्षिणा।
सितवस्त्रैस्तु ते सर्वे हरिजनीयाः समं ततः। विचित्रैर्हेमकरकैर्हेमसूत्रांगुलीयकैः। वासोभिः शय
नीयैश्च प्रतियामेषु यत्नतः। भोजनं चापि दातव्यं यावत्तस्याधिवासनं। बलिस्त्रिसंध्यं देयस्तु भू
तेभ्यः सर्वतो दिशं। ब्राह्मणान्भोजयेत्तत्र वेदशो बान्वर्णास्तु कामतः। रात्रौ महोत्सवः कार्यो नृत्यगी
तकमंगलैः। सदा हृज्याः प्रयत्नेन च तन्त्रधीः कर्मयावत्। त्रिरात्रमेकरात्रं वा पंचरात्रमथापि वा। सप्तरा
त्रमथो कुर्यात्सद्विसद्योऽधिवासनं। सर्वथा फलं यस्मादधिवासात्समं तथा। इति श्रीमत्स्यपुरा
णे आधिवासनविधिः॥ सूत उवाच। कृत्वाधिवासं देवानां स्नपनं कुर्यात्समाहितः। प्रासादस्था
नुरूपेण मानाल्लिंगस्य वा पुनः। पुष्पोदकेन पश्चात्सा प्रोक्तेन मंत्रयुतेन तु। पातयेत्तु यत्न सूत्रं तु द्वारे
प बृंतथेवच। आश्रये त्वं किं विदि शानं मध्यं त्वादि शं बुधः। शानो माश्रितं देवेशजयं त्रिदिवौ
कसः। आयुरारोग्यफलदमथो तस्समाश्रितं। त्वभ्रं स्याद् प्रोक्तमनन्यथा स्थापनं बुधैः। अ
धः कूर्मशिला प्रोक्ता सदा ब्रह्मशिलाधिका। उपर्यन्ते स्थिता तस्या ब्रह्मभागाधिका शिला। त
स्याः पिंडिका कार्या दूर्वाभिर्निर्मलैस्तले। ततः पुष्पांजलिं तां कृत्वा पंचगव्येन पिंडिकां। कषाय
तोयेन पुनः मंत्रयुक्तेन सर्वतः। देवतां च श्रियं मंत्रात्पिंडिकासु नियोजयेत्। ततस्तु स्थापयेद्देवं उत्ति
ष्ठ ब्रह्मलोकेति च। आनीय गर्भभवनं पीठं तं स्थापयेत्पुनः। अर्घ्यं च पाद्यकं तत्र मधुपर्कं प्रयोज
येत्। ततो मुहूर्ते विप्रश्च रत्नन्यासं समाचरेत्। वज्रमौक्तिकवैडूर्यशंखस्फटिकमेव च। पुष्प
रागेंद्रनीलं च नीलं सर्वादितः क्रमात्। तालकं च शिला वज्रमंजनं श्याममेव च। कांस्यकौ सीस

मात्ली कं गैरिकं वादितः क्रमात् । गोधूमं च यवं तद्वत्तिलं मुद्गं तथैव च । नीवारमथ श्यामाकं सर्व
पंचव्रीहिमेव च । न्यसेत् क्रमेण लाक्षां दिव्यचंदनं रक्तचंदनं । अगुरुं चांजनं वापि उशीरं च ततः परं ।
वैलवीं सह देवी च लताक्षुलं च ततः परं । स्वर्लोकपालनाम्ना तु न्यसेत् ओंकारपूर्वकं । सर्ववी
१२ जान्नि धातूं स्वर्गं रत्नान्यौषधयस्तथा । कांचनं पद्मरागं च पारदं पदमेव च । कूर्मं धरा वृषं
तत्र न्यसेत् स्वर्णादिभिः क्रमात् । ब्रह्मस्थाने तु दत्तव्याः संहताः स्युः परस्परं । कनकं विद्रुमं
12 ताम्रं कांस्यं चैव रौप्यं कूटकं । रत्नं तु विमलं पुष्पं लोहं चानुक्रमेण च । कांचनं हरितालं च स
र्वभावे विनिक्षिपेत् । दध्याद्योपधिस्थाने सह देवीय वा न्यसेत् । न्यासमंत्रानतो वक्ष्ये लो
कपालात्मकानहं । इन्द्रस्तु सहस्ता दीप्तः सर्वदेवाधिपो महान् । वज्रहस्तो महासत्त्वस्तस्मै
नित्यं नमो नमः । आग्नेयः पुरुषो रक्तः सर्वदेवमयोव्ययः । धूमकेतू रजोध्यक्षस्तस्मै नित्यं
नमो नमः । यमश्च्छ्यामलवर्णाभः किरीटी दंडधृक् सदा । धर्मसाक्षी विशुद्धात्मा तस्मै नित्यं
नमो नमः । निरृतिस्तु पुमान् कृष्णः सर्वरक्षोधिपो महान् । खड्गहस्तो महासत्त्वस्तस्मै नित्यं न १२
मो नमः । वरुणो धवलो विष्णुः पुरुषो निम्नगाधिपः । पाशहस्तो महाबाहुस्तस्मै नित्यं नमो
नमः । वायुश्च सर्ववर्णो वै सर्वगंधवहः शुभः । पुरुषो ध्वजहस्तश्च तस्मै नित्यं नमो नमः । सो
मश्च पुमान् सौम्यः सर्वौषधिसमन्वितः । नक्षत्राधिपतिः सोमस्तस्मै नित्यं नमो नमः ।
ईशानः पुरुषः शुक्लः सर्वविद्याधिपो महान् । शूलहस्तो विरूपाक्षस्तस्मै नित्यं नमो नमः ।

हे:३

पद्मासनयोनिश्चतुर्मूर्त्तिर्वेदराशिः पितामहः। यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नमः। योसा
वनंतरूपेण ब्रह्माण्डं सचराचरं। पुष्णाति ब्रह्मरूपेण मूर्द्धि तस्मै नित्यं नमो नमः। ओंकारपूर्वकाय
त्विन्यासेवाप्निनिवेदने। मंत्राः स्युः सर्वकार्याणां वृद्धिपुत्रफलप्रदाः। न्यासं कृत्वा तु तन्नीना
पायसेनानुलेपितं। पटेनाच्छादयेत्तं स्वभावं पुण्येनो वरियत्नतः। ततउत्थापयेद्देवं शंखमिश्रं प्र
तुष्टुवामले। ध्रुवाद्यौरिति मंत्रेण स्वभावोपरि निवेशयेत्। ततः स्थिरीकृतस्यास्य हस्तं दत्वा तु मस्त
के। ध्यात्वा परमहंसं देवदेवं च निष्कलं। देवदूतं तथा सोमं पूरयन्स्तु तेत तथैव च। आत्मानमीश्वरं कृ
त्वा नानाभरणभूषितं। यस्य देवस्य यद्रूपं तद्ध्यानेन स्मरेत्तथा। अतसीपुष्पसंकाशं शंखचक्र
गदाधरं। संस्थापयामि देवेशं देवीभूत्वा जनार्दनं। अर्द्धचंद्रधरं वाहं चंद्रार्द्धकृतशेखरं। गजेशं
वृषसंस्थं च स्थापयामि त्रिलोचनं। कृतिभिः संस्तुतं देवं चतुर्वक्त्रं जटाधरं। पितामहं महाबाहुं
स्थापयामि स्वयं भुजोद्भवं। सहस्रकिरणं शान्तं तमसा रोगनाशसंयुतं। पद्महस्तं महाबाहुं स्थापया
मि दिवाकरं। वेदमंत्रास्तथा रौद्रा रुद्रस्य स्थापने जपेत्। विष्णोस्तु वैष्णवास्तत्र ब्रह्मणो ब्राह्मणो
बुधः। सौराः सूर्यस्य जप्तव्यास्तथान्ये पुत्रदाश्रयाः। वेदमंत्रप्रतिकृ सृतस्मादानं ददाति नी।
स्थापयेद्गुरु देवेशं तं प्रधानं प्रकल्पयेत्। तस्य पार्श्वे स्थितानन्यान् संस्मरेत्तान्युचारवत्। गणे
नंदिं महाकालं वृषभं गिरिशं गुहं। देवीं बलाहकं चैव विष्णुं ब्रह्माणमेव च। रुद्राक्षं जयंतं च
लोकपालान् समंततः। तथैवाप्सरसः सर्वा गंधर्वगणगुह्यकान्। यो यत्र स्थापयेद्देवं तस्य

तान्वरितः स्मरेत्। आवाहयेत्तथा रुद्रं मंत्रेणानेन यत्नतः। यस्यासिंहारथेयुक्ता व्याघ्रा भूतास्त
थोरगाः। रुद्रयो लोकपालाश्च देवाः स्कंदस्तथा गुहः। प्रियागणा मातरश्च सोमो विष्णुः पितामहः।
नागा यक्षाः सगंधर्वा ये च दिव्या नभःस्थिताः। तमहं रुद्रमीशानं शिवं रुद्रमुमापतिं। आवाहयामि
रु सगणं सपत्नीकं वृषध्वजं। ॐ आगच्छ रुद्र भगवन् तुभ्यं नाय शिवो भव। शाश्वतो भव सूर्जा प्रतिगृहाण। ॐ
13 नमो नमः। ॐ नमः स्वागतमनु स्वागतं भवते। ॐ नमः सोमाय [illegible] गणाय सपरिवाराय परिगृह्णातु
भवान् मंत्रपूतमिदमर्घ्यं पाद्यमाचमनीयमासनं वा सलाभिहितं नमो नमः स्वाहा। ततः पुण्याहघो
षेण ब्रह्मघोषेश्च पुष्कलैः। स्नापयेत् [illegible] यीतां ततो देवं दधिक्षीरघृतेन च मधुशर्करया तद्वत् पुष्प
गंधोदकेन च। शिवध्यानैकचित्तस्तु मंत्रानेतानुदीरयेत्। यज्जाग्रतो दूरमुदैति ततो विराडजा
यत इति सहस्रशीर्षा पुरुष इति। अभि त्वा शूर नोनुम इति पुरुष एवेदं सर्वमिति त्रिपादूर्ध्व
मिति नत्वा वां अन्यदन्य इति सर्वास्त्वेतान् प्रतिष्ठास्तु मंत्रान् जपेत्पुनःपुनः। चतुःसर्वं स्नपनं दद्या
मूलमंत्रेण शिरस्यापि स्थापितं तु ततो देवं यजमानो यथा मूर्तिमान्। आचार्यं पूजयेद्भक्त्या वस्त्रा
लंकारभूषणैः। दीनांधकृपणांस्तद्वद्ये चान्ये समुपस्थिताः। ततस्तु मधुना देवं प्रथमेऽहनि ले १२
पयेत्। हरिद्रया च लिंप्यापि द्वितीयेऽहनि तत्त्वतः। चंदनेन यवैस्तद्वत् तृतीयेऽहनि लेपयेत्। मनः
शिलाप्रियंगुभावच तुर्थेऽहनि लेपयेत्। सौभाग्यं भद्रं तस्या लेपनं व्याधिनाशनं। पंचमीति कुंकुमेना
भेतहरवि [illegible] विदुः। कश्मीजनं तिलतद्वत् पंचमेऽपि निवेदयेत्। पक्वे तु सघृतं दद्यात् ब्रदनपुष्पकैः।
रेचनानाम पुष्पं च सप्तमेऽहनि [illegible] तत्र सर्वं निवेदयेत्। स्थितं च

लयेद्देवमन्यथा दोषभाग्भवेत्। सुरयेत्सिकताभिस्तु निःछिद्रं सर्वतो भवेत्। लोकपालस्य दिशि
भागे यस्य संचलते विभुः। तस्य लोकपतेः शांतिर्देवि पार्श्वे ध्वदद्विजोत्तमाः। इंद्राय वारणं दद्यात्कांच
नं चाल्पवित्तवान्। अग्नेः सुवर्णमेवस्यात् याम्यस्य महिषं तथा। अजं च कांचनं दद्यान्मुरवेरान्तसं
प्रति। वरुणे प्रतिमुक्तानि सप्तकानि प्रकल्पयेत्। रीतिकां वायवे दद्याद्वस्त्रयुग्मेन संयुतां। सोमा
य धेनुं दत्त्वा रजतं सह बंधिवे। यस्यां यस्यां संचलनं प्राप्तिः स्यात्तत्र तत्र तु। अन्यथा तु भवे
त्घोरं भयं कुलविनाशनं। अवर्तकारयेत्तस्मात्तत् सिकताभिः सुरेश्वरं। अन्नैर्वस्त्रैश्च दत्तैर्वप्र
ल्पाहयशः मंगलं। त्रिपंचसप्तवासादिनानि स्याग्महोत्सवः। चतुर्थेह्नि महास्नानं चतुर्थीकर्म
कारयेत्। दक्षिणा च पुनस्तद्देया त्राध्वि स्वशक्तितः। वेदः प्रतिष्ठा विधिरेषु तुभ्यं निवेदितः पाप
विनाशहेतोः। तस्माद्बुधैः सर्वमनंतमुक्तमनेकविद्याधरदेवयुष्टं। इति श्रीमत्स्यपुराणे प्रतिष्ठा
नुकीर्तनं समाप्तं शुभं भूयात्॥ सूत उवाच॥ अतः परं प्रवक्ष्यामि देवस्नपनमुत्तमं। कल्पयेत्कुसु
[illegible] अर्घ्यस्यापि समासेन शृणुध्वं व्रतमुत्तमं। वर्द्धदत्त कुशाग्रा लाजास्तीर दूर्वा तथा मधु। यवाः
सिद्धार्थकास्तद्दद्यांगो धर्पः फलैः सह। गजाश्वरथवल्मीकवराहोत्खातमंडलात्। अग्न्यागारा
त्तथा तीर्थाद्राजकामंडलादपि। कुंभेषु मृत्तिकादेया उद्धृतासीति मंत्रवित्। शन्नो देवीरपां मंत्रमा
पोहिष्ठेति जपतः। सावित्र्यादाय गोमूत्रं गंधद्वारेति गोमयं। आप्यायस्वेति च क्षीरं दधिक्राव्णेति
वै दधि। तेजोसीति घृतं तद्वद्देवस्य त्वेति चोदकं। कुशानि श्रंपवे हिद्दान् पंचगव्यं भवेत्ततः। आपा
यं पंचगव्येन दद्याम्पुष्टेन वैततः। दधिक्राव्णेति मंत्रेण कर्तव्यमभिमंत्रणं। आप्यायस्वेति पय

सा तेजो सीति घृतेन च। मधुवातेति मधुना पुनः। पुष्पोदकेन च। सरस्वत्ये भैषज्येन कार्यं तस्याभिमं
त्रणं। हिरण्यवर्णेति मंत्रेण स्नापयेद्रत्नवारिणा। कुशांभसा ततः स्नानं देवस्यत्वेति कारयेत्। फलो
दकेन च स्नानं इमं मे गंग आयाहि कारयेत्। ततस्तु गंधतोयेन सावित्र्या चाभिमंत्रयेत्। ततो घटसहस्रे
१८ ण सहस्रार्द्धेन वा पुनः। चतुर्भिरथवा कुर्यात् घटनायां च वित्तवान्। सौवर्णै राजतैर्वापि ताम्रैर्वा रीति
15 कोद्भवैः। कांस्यैर्वा पार्थिवैर्वापि स्नापनं शक्तितो भवेत्। सहदेवी वचा व्याघ्री बला चातिबला त
था। शंखपुष्पी तथा सिंही अष्टमी च सुवर्चला। महौषध्यष्टकं येन महास्नाने युतो भवेत्। यवगो
धूमनीवारतिलश्यामाकशालयः। प्रियंगवो व्रीहयश्च स्नानेषु परिकल्पिताः। स्वस्तिकं पद्मकं
शंखमुत्पलं कमलं तथा। श्रीवत्सं दर्पणं तद्वन्नंद्यावर्त्तमियाष्टकं। एतानि गोमयैः कुर्यात् गजावा
शुभं तथा। यववर्णेन्दिनस्तद्वत् पंचवर्णरजस्तथा। दूर्वाक्षतसतिलं दध्या नीराजनविधिर्मतः।
एवं नीराजनं कृत्वा दद्यादाचमनं बुधः। मंदाकिन्यास्तु यद्वारि सर्वपापापहं शुभं। ततो वस्त्रयुगं दद्या
न्मंत्रेणानेन यत्नतः। देवस्त्वं समायुक्ते यज्ञदत्ते समन्विते। सर्वविघ्नप्रशमे देववाससी तव निर्मि
ते। ततस्तु चंदनं दद्यात् समं कर्पूरकुंकुमैः। इमम्मुच्चारयेन्मंत्रं दर्भपाणिः प्रयत्नतः। शरीरं ते न १८
जानामि चेष्टां नैव च नैव च। मया निवेदिता गंधान् प्रतिगृह्य विलिप्यताम्। चत्वारि शृंगा ततो द
पान्न दद्याद्धे वपर्द्धितलाभम्। ॐ [illegible] सूर्यचंद्रज्योतिर्विद्युदायं प्रतिगृह्यतां। ततस्तानेनमंत्रेण धू
पं दद्यात् हविर्चसैणः। वनस्पतिरसोद्भूतो गंधाढ्यो गंध उत्तमः। मया निवेदितो भक्त्या धूपोयं प्रति

गृह्यतां । ततस्त्वाभरणं दद्यान्महाभूषाय तेन मः । अनेन विधिना कृत्वा सप्तरात्रं महोत्सवं । देव
कुंभैस्ततः कुर्याद्यजमानाभिषेचनं । चतुर्भिरष्टभिर्वापि द्वाभ्यामेकेन वा पुनः । सपंचरत्न कनकैः
१५ सितवस्त्राभिवेष्टितैः । देवस्य त्वेति मंत्रेण साम्ना चाथर्वणेन च । अभिषेके च ये मंत्रा न वग्रहम
खे स्मृताः । सितांबरधरः स्नात्वा देवान्संपूजयेत्ततः । स्थापकं पूजयेद्भक्त्या वस्त्रालंकारभूष
15 णैः । यज्ञभांडानि सर्वाणि मंडपोपस्करादिकं । यच्चान्यदपि तद्गेहे तदाचार्याय दापयेत् । सुप्रस
न्ने गुरौ यस्मात्तुष्यंते सर्वदेवताः । नैतद्विप्रहीनेन नंदाभिकेन तल्लिंगिना स्थापनमंत्रकार्यं
विप्रेण श्रुतिपारगेन गृहस्थधर्माभिरतेन नित्यम् । पाषंडिनं यस्तु करोति भक्त्या विधाय युवि
प्रान् श्रुतिधर्मयुक्तान् । गुरुप्रतिष्ठादिषु तत्र नूनं कुलक्षयं स्याद्विचिरं दशजपः । स्थानं पिशाचैः
परिगृह्यते न दशजपतां त्वावचिरेण लोके । विप्रैः कृतां तच्छुभदं कुलेस्यान्नापिजपतां याति वि
रं च कालम् ॥ इति श्रीमत्स्यपुराणे देवतास्नापनम् ॥ संवत् १८०८ आषाढ शुक्ल प्रतिपदि श
नौ सभाचंद्रगोर्जरो देवतास्थापनादि विधानमलिखत् । शुभम् ॥ ॥ ॥ ॥ १५

२५

देवतास्थापनादि विधानम्

संवत १९०२

पत्राणि १५ (संपूर्णम्)

१५